श्री श्यामला नवरत्नमालिका स्तोत्रं

श्री श्यामला नवरत्नमालिका स्तोत्रं

ओंकारपंजरशुकीं उपनिषदुद्यानकेलिकलकंठीं |
आगमविपिनमयूरीं आर्यामंतर्विभावये गौरीं || 1 ||

दयमानदीर्घनयनां देशिकरूपेण दर्शिताभ्युदयां |
वामकुचनिहितवीणां वरदां संगीतमातृकां वंदे || 2 ||

श्यामतनुसौकुमार्यां सौंदर्यानंदसंपदुन्मेषां |
तरुणिमकरुणापूरां मदजलकल्लोललोचनां वंदे || 3 ||

नखमुखमुखरितवीणानादरसास्वादनवनवोल्लासं |
मुखमंब मोदयतु मां मुक्ताताटंकमुग्धहसितं ते || 4 ||

सरिगमपधनिरतां तां वीणासंक्रांतकांतहस्तां तां |
शांतां मृदुलस्वांतां कुचभरतांतां नमामि शिवकांतां || 5 ||

अवटुतटघटितचूलीताडिततालीपलाशताटंकां |
वीणावादनवेलाकंपितशिरसं नमामि मातंगीं || 6 ||

वीणारवानुषंगं विकचमुखांभोजमाधुरीभृंगं |
करुणापूरतरंगं कलये मातंगकन्यकापांगं || 7 ||

मणिभंगमेचकांगीं मातंगीं नौमि सिद्धमातंगीं |
यौवनवनसारंगीं संगीतांभोरुहानुभवभृंगीं || 8 ||

मेचकमासेचनकं मिथ्यादृष्टांतमध्यभागं ते |
मातस्तव स्वरूपं मंगळसंगीतसौरभं मन्ये || 9 ||

नवरत्नमाल्यमेतद्रचितं मातंगकन्यकाभरणं |
यः पठति भक्तियुक्तः सः भवेद्वागीश्वरः साक्षात् || 10 ||

इति काळिदास कृत श्री श्यामला नवरत्नमालिका स्तोत्रं |